॥ श्रीः ॥

दशकंठविरचितम्

शिवतांडवस्तोत्रम् ।

श्रीमद्ब्रह्मानंदोदासीनशिष्यमाधवानंदविरचितया

व्याख्यया समेतम्

विद्वद्वर्यपंडितपीतांबरैः शोधितम् ।

तच्च

मुंबापुर्यां

निर्णयसागराख्यमुद्रणयंत्रालयाधिपतिना

मुद्रयित्वा प्रसिद्धिं नीतम् ।

शकाब्दाः १८४३–सन १९२१.

मूल्यं १॥ आणकः

॥ टीकाकारकृतं मंगलम् ॥

श्रीगणेशाय नमः ॥ महादेवो देवो जगदुदयरक्षालयकरः स्वभक्तानां स्वांते प्रकटितनिजानंदमहिमा ॥ श्रुतीनां सर्वासां दृढपरमतात्पर्यविषयो रमेत स्वांते नः शिरसि निदधानस्त्रिपथगाम्॥ १ ॥ वंदे वृंदावनासीनं गोपिकानंददं प्रभुम् ॥ श्रीकृष्णं परमानंदं सदाहमखिलेष्टदम् ॥ २॥ वंदे सरस्वतीं देवीं वीणापुस्तकधारिणीम् ॥ पूर्णेंदुवदनां शुभ्रां भक्तानुग्रहकारिणीम् ॥ ३ ॥ चिदानंदप्रदं वंदे भूयो गुरुपदद्वयम् ॥ जानंति मादृशा मर्त्या यत्प्रसादात्स्वमद्वयम् ॥ ४ ॥ श्रीमद्गुरून्नमस्कृत्य माधवानंदसाधुना ॥ दशास्यनिर्मितस्तोत्रे विवृतिः क्रियतेऽधुना ॥ ५ ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ शिवतांडवस्तोत्रप्रारंभः ॥

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलंब्य लंबितां भुजंगतुंगमालिकाम् ॥
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चंडतांडवं तनोतु नः शिवः शिवम् ॥१॥

अथ राक्षसेंद्रो रावणः स्वभक्तिं भगवति श्रीमहादेवे सूचयंस्तमभीष्टसिद्ध्यर्थमभिष्टौति ॥ **जटाटवीत्यादि पंचदशश्लोकैः** ॥ यः शिवः चंडतांडवं चंडं च तत्तांडवं च भयंकरं नृत्यं चकार कृतवान् । सोऽयं शिवो नोऽस्माकं शिवं कल्याणं तनोतु विस्तारयत्वित्यन्वयः । कथंभूतं चंडतांडवं । डमड्डमड्डमड्डमन्निनादवड्डमरु डमड्डमड्डमड्डमन्नित्याकारको निनादः शब्दस्तद्वड्डमरु यस्मिंस्तत् । किं कृत्वा चंडतांडवं चकार । लंबितां भुजंगतुंगमालिकां गलेऽवलंब्य । लंबितां लंबायमानां भुजंगानां सर्पाणां तुंगा उन्नता या मालिका तां गले कंठेऽवलंब्य धृत्वा । कथंभूते गले । जटाटवीगलज्जलप्रवाहपावितस्थले । जटैवाटवी वनं तस्या जटाटव्या गलन्नधः पतन् यो जलस्य प्रवाहस्तेन पावितं स्थलं यस्य तस्मिन्नित्यर्थः ॥ १ ॥

जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनि ॥

धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचंद्रशेखरे रतिः प्रतिक्षणं मम ॥ २ ॥

॥ **जटेति** ॥ किशोरचंद्रशेखरे मम रतिः प्रतिक्षणमस्तु । किशोरो बाल एव चंद्रः किशोरचंद्रः स शेखरः शिरोभूषणं यस्य स किशोरचंद्रशेखरस्तस्मिन्मम रतिःप्रीतिः प्रतिक्षणं सर्वदास्तु । कथंभूते किशोरचंद्रशेखरे । जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरीविलोलवीचिवल्लरीविराजमानमूर्धनि । जटा एव कटाहो जटाकटाहस्तस्मिन् जटाकटाहे संभ्रमेण वेगेन भ्रमंती चासौ निलिंपनिर्झरी । निलिंप्यंत इति निलिंपा देवाः । " लिपि चित्रीकरणे " । प्रतिमासु लिख्यंत इत्यर्थः । तेषां निर्झरी नदी श्रीगंगा तस्या विलोलाश्चंचला या वीचयस्तरंगास्ता एव वल्लर्यो लतास्तासां पंक्तयस्ताभिर्विराजमानः प्रकाशमानो मूर्धा मस्तकं यस्य स तथा तस्मिन् । पुनः कथंभूते किशोरचंद्रशेखरे । धगद्धगद्धगज्वलल्ललाटपट्टपावके । धगद्धगद्धगदित्याकारकेण शब्देन ज्वलन्प्रकाशमानो ललाट एव पट्टो ललाटपट्टः पीठस्तस्मिन् ललाटपट्टे पावकोऽग्निर्यस्य स तथा तस्मिन्नित्यर्थः ॥२॥

धराधरेंद्रनंदिनीविलासबंधुबंधुर-
स्फुरद्दृगंतसंततिप्रमोदमानमानसे ॥
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगंबरे मनो विनोदमेतु वस्तुनि ॥ ३ ॥

॥ **धराधरेंद्रेति** ॥ मम मनः क्वचिद्दिगंबरे वस्तुनि विनोदं आनंदं एतु प्राप्नोतु । कथंभूते दिगंबरे । धराधरेंद्रनंदिनीविलासबंधुबंधुरस्फुरद्दृगंतसंततिप्रमोदमानमानसे । धरंतीति धराः । धरायाः पृथिव्या

धरा धराधराः पर्वतास्तेष्विंद्रो धराधरेंद्रो हिमालयस्तस्य नंदिनी सुता पार्वती तस्या धराधरेंद्रनंदिन्या विलासानां क्रीडाविशेषाणां बंधवो विलासबंधवः विलासबंधवश्च ते बंधुरा अतिसुंदराश्च विलासबंधुबंधुराः स्फुरंतश्च प्रकाशमानास्त एव दृगंता दृशोंऽता दृगंताः कटाक्षा विलासबंधुबंधुरस्फुरद्दृगंतास्तेषां संततिः पंक्तिस्तया प्रमोदमानमानंदयुक्तं मानसं मनो यस्य स तथोक्तस्तस्मिन् । पुनः कथंभूते दिगंबरे । कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि । कृपायाः कटाक्षास्तेषां धोरणी परंपरा पंक्तिः कृपाकटाक्षधोरणी तया निरुद्धा दूरीकृता दुःखेन धर्तुं शक्या दुर्धरा कष्टरूपा भक्तानामापदापत्ति-र्विपत्तिर्येन स तस्मिन्नित्यर्थः ॥ ३ ॥

जटाभुजंगपिंगलस्फुरत्फणामणिप्रभा-
कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमुखे ॥
मदांधसिंधुरास्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ४ ॥

॥ **जटाभुजंगेति** ॥ मम मनो भूतभर्तरि अद्भुतं विनोदं बिभर्तु । भूतानां स्थावरजंगमानां भर्ता पालकस्तस्मिन्नद्भुतमाश्चर्यरूपं विनोदं क्रीडाविशेषं धारयत्वित्यर्थः । कथंभूते भूतभर्तरि । जटा-भुजंगपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवप्रलिप्तदिग्वधूमुखे । जटानां भुजंगा जटाभुजंगाः सर्पाः । स्फुरंत्यः प्रकाशमानाश्च ताः फणाश्चेति स्फुरत्फणाः । पिंगलाः पीतवर्णाश्च ता एव स्फुरत्फणाश्चेति पिंगलस्फुरत्फणाः । जटाभुजंगानां पिंगलस्फुरत्फणाः जटाभुजंगपिं-गलस्फुरत्फणास्तासां जटाभुजंगपिंगलस्फुरत्फणानां मणयस्तेषां प्रभाः

प्रकाशास्तासां कदंबः समूहः स एव कुंकुमद्रवस्तेन जटाभुजंगपिंगलस्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवेण प्रलिप्तानि दिशा एव वध्वः स्त्रियस्तासां मुखानि येन स तस्मिन्नित्यर्थः ॥ पुनः कथंभूते भूतभर्तरि । मदेनांधो मदांधश्चासौ सिंधुरासुरो गजासुरश्च मदांधसिंधुरासुरस्तस्य मदांधसिंधुरासुरस्य त्वक् चर्म सैवोत्तरीयमुपरिवस्त्रं तेन मदांधसिंधुरासुरत्वगुत्तरीयेण मेदुरः सुंदरस्तस्मिन् मदांधसिंधुरासुरत्वगुत्तरीयमेदुरे मम मनः अद्भुतं विनोदं बिभर्त्वित्यर्थः ॥४॥

ललाटचत्वरज्वलद्धनंजयस्फुलिंगया
निपीतपंचसायकं नमन्निलिंपनायकम् ॥
सुधामयूखरेखया विराजमानशेखरं
महः कपालि संपदे सरिज्जटालमस्तु नः ॥ ५ ॥

॥ **ललाटेति** ॥ महस्तेजोरूपः श्रीमहादेवः नोऽस्माकं संपदे धर्मार्थकाममोक्षरूपसंपत्तयेऽस्तु भवतु । कथंभूतं महः । कपालमस्यास्तीति कपालि । पुनः कथंभूतं महः । ललाटचत्वरज्वलद्धनंजयस्फुलिंगया निपीतपंचसायकं । ललाटमेव चत्वरं ललाटचत्वरं। ज्वलंश्चासौ धनंजयो ज्वलद्धनंजयः । ललाटचत्वरे ज्वलद्धनंजयो ललाटचत्वरज्वलद्धनंजयस्तस्य ललाटचत्वरज्वलद्धनंजयस्य स्फुलिंगा कणिका तया ललाटचत्वरज्वलद्धनंजयस्फुलिंगया निपीतो निःशेषेण पीतो नाशितः पंचसायकः कामदेवो येन तत् । पुनः कथंभूतं महः । नमतीति नमन् निलिंपानां देवानां नायको निलिंपनायक इंद्रः । नमन् निलिंपनायको यस्मिंस्तत् । यद्वा । नमंतीति नमंतः नमंतो निलिंपनायका ब्रह्मविष्ण्विंद्रादयो यस्मिंस्तत् ।

पुनः कथंभूतं महः । सुधा अमृतरूपा मयूखा अंशवो यस्य स सुधामयूखश्चंद्रस्तस्य सुधामयूखस्य रेखा तया विराजमानं शेखरं यस्य तत् । पुनः कथंभूतं महः । सरिता गंगया युक्ता जटा सरिज्जटा सास्यास्तीति तदित्यर्थः ॥ ५ ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसरांघ्रिपीठभूः ॥
भुजंगराजमालया निबद्धजाटजूटकः
श्रिये चिराय जायतां चकोरबंधुशेखरः ॥ ६ ॥

॥ **सहस्रेति** ॥ चकोरबंधुशेखरो नोऽस्माकं चिराय बहुकालं श्रिये वर्गचतुष्टयसंपत्तये जायतां प्रादुर्भवतु। चकोराणां बंधुश्चकोरबंधुश्चंद्रः स चकोरबंधुः शेखरः शिरोभूषणं यस्य स चकोरबंधुशेखरः । कथंभूतश्चकोरबंधुशेखरः सहस्राणि लोचनानि यस्य स सहस्रलोचन इंद्रः स प्रभृतिरादिर्येषां ते सहस्रलोचनप्रभृतयः अशेषाश्च ते लेखाश्चाशेषलेखाः सर्वदेवाः । सहस्रलोचनप्रभृतयश्च तेऽशेषलेखाश्च सहस्रलोचनप्रभृत्यशेषलेखास्तेषां शेखराणि मुकुटानि तेषां शेखराणां प्रसूनानि पुष्पाणि तेषां प्रसूनानां धूलयो रजांसि तेषां धूलीनां धोरणी पंक्तिस्तया धोरण्या विधूसरा लिप्ता अंघ्र्योश्चरणयोः पीठस्य भूर्यस्य स सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधूलिधोरणीविधूसरांघ्रिपीठभूः । पुनः कथंभूतश्चकोरबंधुशेखरः । भुजंगानां राजा भुजंगराजो वासुकिस्तस्य भुजंगराजस्य माला तया भुजंगराजमालया जटानामयं जाटः जाटश्चासौ जूटश्च जाटजूटः । निबद्धो जाटजूटो येन स एवंभूतः श्रीमहादेवो नोऽस्माकं श्रियं तनोत्वित्यर्थः ॥ ६॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनंजयाहुतीकृतप्रचंडपंचसायके ॥
धराधरेंद्रनंदिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥ ७ ॥

॥ करालेति ॥ त्रिलोचने मम रतिः प्रीतिरस्तु । कथंभूते त्रिलोचने । करालं भयंकरं च तद्भालं मस्तकं करालभालमेव पट्टिका पीठस्तस्यां धगद्धगद्धगदिति शब्देन ज्वलंश्चासौ धनंजयोऽग्निस्तस्मिन्नासमंतात् हुतीकृतः प्रचंडो भयंकरः पंचसायकः कामदेवो येन स करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनंजयाहुतीकृतप्रचंडपंचसायकस्तस्मिन्नित्यर्थः । पुनः कथंभूते त्रिलोचने । धराधरेंद्रस्य हिमालयस्य नंदिनी सुता पार्वती तस्याः कुचौ स्तनौ तयोरग्रे चित्रमेव पत्रकं तिलकविशेषस्तस्य धराधेंद्रनंदिनीकुचाग्रचित्रपत्रकस्य प्रकल्पने रचनायां एकः मुख्यः स एव शिल्पी चित्रकर्ता तस्मिन् धराधरेंद्रनंदिनीकुचाग्रचित्रपत्रकप्रकल्पनैकशिल्पिनि रतिर्ममास्त्वित्यर्थः ॥ ७ ॥

नवीनमेघमंडलीनिरुद्धदुर्धरस्फुर-
त्कुहूनिशीथिनीतमःप्रबंधबद्धकंधरः ॥
निलिंपनिर्झरीधरस्तनोतु कृत्तिसुंदरः
कलानिधानबंधुरः श्रियं जगद्धुरंधरः ॥ ८ ॥

॥ नवीनेति ॥ जगद्धुरंधरो नोऽस्माकं श्रियं तनोतु । जगतस्त्रिलोक्या धूर्भारस्तं धरतीति जगद्धुरंधरः। कथंभूतो जगद्धुरंधरः । मेघानां मंडली पंक्तिरिति मेघमंडली नवीना चासौ मेघमंडलीति नवीनमेघमंडली तया नवीनमेघमंडल्या निरुद्धं निबद्धं तदेव दुर्धरं

दुःखेन धर्तुं शक्यं स्फुरत्प्रकाशमानं यत्कुहूनिशीथिनीतमः कुहा अमावास्याया निशीथिन्यर्धरात्रं तस्यास्तमस्तस्य प्रबंधो नैरंतर्यं तेन बद्धा कंधरा ग्रीवा येन स नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमःप्रबंधबद्धकंधरः। पुनः कथंभूतः। निलिंपानां देवानां निर्झरी नदी श्रीगंगा तस्याः धरः। पुनः कथंभूतः। कृत्त्या मृगचर्मणा सुंदरः शोभनः। पुनः कथंभूतः। कलानिधानबंधुरः। कला अवयवाः निधीयंते स्थाप्यंतेऽस्मिन्निति कलानिधानश्चंद्रस्तेन बंधुरः सुंदर इत्यर्थः ॥ ८ ॥

प्रफुल्लनीलपंकजप्रपंचकालिमप्रभा–
वलंबिकंठकंदलीरुचिप्रबद्धकंधरम् ॥
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदांधकच्छिदं तमंतकच्छिदं भजे ॥ ९ ॥

॥ **प्रफुल्लेति** ॥ अंतकः कालस्तं छिनत्तीत्यंतकच्छित्तमंतकच्छिदं श्रीमहादेवमहं भजे। कथंभूतं तं। प्रकर्षेण फुल्लतीति प्रफुल्लं विकसितं तच्च तन्नीलपंकजं तस्य प्रपंचो विस्तारस्तस्य या कालिमा कालुष्यं तस्या या प्रभा तामवलंबितुं शीलं यस्याः सा प्रभावलंबिनी। प्रभावलंबिनी चासौ कंठकंदली च प्रभावलंबिकंठकंदली। तस्याः कंठकंदल्या रुचिः। तया कंठकंदलीरुच्या प्रकर्षेण बद्धा कंधरा ग्रीवा येन सः प्रफुल्लनीलपंकजप्रपंचकालिमप्रभावलंबिकंठकंदलीरुचिप्रबद्धकंधरस्तमित्यर्थः। पुनः कथंभूतं तं। स्मरः कामस्तं छिनत्तीति स्मरच्छित्तं। पुनः कथंभूतं तं। पुरस्त्रिपुरासुरस्तं छिनत्तीति पुरच्छित्तं। पुनः कथंभूतं तं। भवः संसारस्तं छिनत्तीति

भवच्छित्तं । पुनः कथंभूतं तं । मखो दक्षयज्ञस्तं छिनत्तीति मखच्छित्तं । पुनः कथंभूतं तं । गजो गजासुरस्तं छिनत्तीति गजच्छित् अंधकोऽधकासुरस्तं छिन्नत्तीत्यंधकच्छित् गजच्छिच्चासावंधकच्छिच्चेति तमित्यर्थः ॥ ९ ॥

अखर्वसर्वमंगलाकलाकदंबमंजरी–
रसप्रवाहमाधुरीविजृंभणामधुव्रतम् ॥
स्मरांतकं पुरांतकं भवांतकं मखांतकं
गजांकतांधकांतकं तमंतकांतकं भजे ॥ १० ॥

॥ **अखर्वेति** ॥ तमंतकांतकमहं भजे । अंतोऽवसानं तत्करोतीत्यंतको यमस्तस्यांतकस्याप्यंतकोऽतकांतकस्तं । कथंभूतमंतकांतकं । अखर्वमधिकं सर्वमंगलं यासु ताः कलाश्चतुःषष्टिविद्यास्ता एव कदंबो वृक्षविशेषस्तस्य मंजर्यो लतास्तासां मंजरीणां रसः सारस्तस्य प्रवाहस्तस्य प्रवाहस्य माधुरी मधुरता तस्या मधुरताया विजृंभणा स्फुटता तस्या मधुव्रतो भ्रमरस्तं । विद्यासमुदायस्य तत्त्वं जानातीत्यर्थः । तदुक्तं । 'सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः ॥ सर्वशास्त्रमयी गीता सर्वविद्यामयः शिवः' इति ॥ पुनः कथंभूतं तं । स्मरांतकं । स्मरस्य कामस्यांतं करोतीति स्मरांतकस्तं । पुनः कथंभूतं तं । पुरांतकं । पुरस्यांतकः पुरांतकस्तं । पुनः कथंभूतं तं । भवांतकं । भवस्य संसारस्यांतको भवांतकस्तं । पुनः कथंभूतं तं । मखांतकं । मखो दक्षयज्ञस्तस्यांतकस्तं । पुनः कथंभूतं तं । गजस्य गजासुरस्यांतकः अंधकस्यांतकोऽधकांतकः गजांतकश्चासावंधकांतकश्चेति तमित्यर्थः ॥ १० ॥

जयत्यदभ्रविभ्रमभ्रमद्भुजंगमश्वसद्
विनिर्गमक्रमस्फुरत्करालभालहव्यवाट् ॥
धिमिंधिमिंधिमिंध्वनन्मृदंगतुंगमंगल-
ध्वनिक्रमप्रवर्तितप्रचंडतांडवः शिवः ॥ ११ ॥

॥ **जयतीति** ॥ शिवो जयति सर्वोत्कर्षेण वर्तते। कथंभूतः शिवः। अदभ्र उत्कृष्टो यो विभ्रमो वेगस्तेन भ्रमंतो ये भुजंगमास्तेषां श्वसतः प्राणस्य विनिर्गमो बहिर्गमनं तस्य विनिर्गमस्य यः क्रमस्तेन स्फुरन् प्रकाशमानः करालभाले करालं दुष्टजनानां भयंकरं यद्भालं मस्तकं तत्र हव्यवाट् अग्निर्यस्य स तथा। पुनः कथंभूतः शिवः। धिमिंधिमिंधिमिमित्याकारेण ध्वनन् शब्दं कुर्वन् यो मृदंगो वाद्यविशेषस्तस्य तुंग उन्नतो यो मंगलध्वनिर्मंगलसूचकः शब्दविशेषस्तस्य मृदंगमंगलध्वनेः क्रमस्तेन क्रमेण प्रवर्तितं प्रारब्धं प्रचंडतांडवं भयंकरं नृत्यं येन सः। धिमिंधिमिंधिमिंध्वनन्मृदंगतुंगमंगलध्वनिक्रमप्रवर्तितप्रचंडतांडव इत्यर्थः ॥ ११ ॥

दृषद्विचित्रतल्पयोर्भुजंगमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्टयोः सुहृद्विपक्षपक्षयोः ॥
तृणारविंदचक्षुषोः प्रजामहीमहेंद्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥१२॥

॥ **दृषदिति** ॥ अहं कदा कस्मिन्काले सदाशिवं श्रीमहादेवं भजामि सेविष्ये। कथंभूतोऽहं। एतेषु समप्रवृत्तिकः केषु दृषत्पाषाणः विचित्रतल्पं च पुष्पादिनिर्मिता शय्या तयोः समा रागद्वेषादिरहिता प्रवृत्तिर्यस्य स तथा। पुनः कथंभूतोऽहं। भुजंगः सर्पः

मौक्तिकानां स्रक् माला तयोः भुजंगमौक्तिकस्रजोः समप्रवृत्तिकः। पुनः कथंभूतोऽहं। गरिष्ठं महार्घं यद्रत्नं लोष्टं च मृत्पिंडस्तयोर्गरिष्ठरत्नलोष्टयोः समप्रवृत्तिकः। पुनः कथंभूतोऽहं। सुहृन्मित्रं विपक्षश्च शत्रुस्तयोः पक्षौ सुहृद्विपक्षपक्षौ तयोः समप्रवृत्तिकः। पुनः कथंभूतोऽहं। तृणं चारविंदमिव चक्षुषी यस्याः स्त्रियः सा च तयोस्तृणारविंदचक्षुषोः समप्रवृत्तिकः। पुनः कथंभूतोऽहं प्रजा च मह्याः पृथिव्या महेंद्रो राजा च तयोः प्रजामहीमहेंद्रयोः समप्रवृत्तिक इत्यर्थः॥ १२॥

कदा निलिंपनिर्झरीनिकुंजकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरस्थमंजलिं वहन्॥
विलोललोललोचनाललामभाललग्नकं
शिवेति मंत्रमुच्चरन्सदा सुखी भवाम्यहम्॥१३॥

॥ **कदेति** ॥ अहं कदा सदा सुखी भवामि। कथंभूतोऽहं। सदा सर्वदा विमुक्ता परित्यक्ता दुर्मतिर्येन स विमुक्तदुर्मतिः। किं कुर्वन्सन्। निलिंपनिर्झरीनिकुंजकोटरे वसन्। निलिंपानां देवानां निर्झरी नदी श्रीगंगा तस्या निलिंपनिर्झर्या निकुंजो लतापिहितस्थानं तस्य लतापिहितस्थानस्य कोटरो मध्यदेशस्तस्मिन्वसन्निवासं कुर्वन्सन्। पुनः किं कुर्वन्। शिरसि तिष्ठतीति शिरस्थस्तमंजलिं करद्वयसंयोगरूपं सदा वहन् प्राप्नुवन्सन्। पुनः किं कुर्वन्। शिवेति मंत्रमुच्चरन्। कथंभूतं शिवेति मंत्रं। विशेषेण लोलाश्चंचला या लोललोचनाश्चंचलनेत्राः स्त्रियस्तासु ललामं रत्नं पार्वतीरूपं तस्य पार्वतीरूपरत्नस्य भाले मस्तके लग्नमेवेति लग्नकं। पार्वतीभालपट्टे विधिलिखितादृष्टेन प्राप्तमित्यर्थः॥ १३॥

निर्लिंपनाथनागरीकदंबमौलिमल्लिका–
निगुंफनिर्भरक्षरन्मधूष्णिकामनोहरः ॥
तनोतु नो मनोमुदं विनोदिनीमहर्निशं
परश्रियः परं पदं तदंगजत्विषां चयः ॥ १४ ॥

॥ निर्लिंपेति ॥ तदंगजत्विषां चयः तस्य श्रीमहादेवस्यांगानि तदंगानि तेभ्यो जायंत इति तदंगजास्ताश्च तास्त्विषस्तेजांसि तासां त्विषां समूहो नोऽस्माकं मनो मुदं हर्षं तनोतु विस्तारयतु । कथंभूतस्तदंगजत्विषां चयः निर्लिप्यंते लिप्यंते प्रतिमारूपेणेति निर्लिंपा देवास्तेषां नाथः स्वामींद्रस्तस्य निर्लिंपनाथस्य नगरे भवा नागर्योऽप्सरसस्तासां निर्लिंपनाथनागरीणां कदंबः समूहस्तस्य कदंबस्य मौलयः शिरांसि तेषु मल्लिकानां पुष्पविशेषाणां निगुंफानि यानि गुच्छकानि तेषां निगुंफानां निर्भरो बाहुल्यं तस्मान्निगुंफनिर्भरात् क्षरंति यानि मधूनि पुष्पधूलयस्तैर्या उष्णिका प्रस्वेदस्तया मनोहरः सुंदरः । पुनः कथंभूतस्त्विषां चयः । परश्रियः परंपदं । परमलक्ष्म्याः परमस्थानं कथंभूतां मनो मुदं । अहर्निशं विनोदिनीं दिवारात्रं हर्षजनकामित्यर्थः ॥ १४ ॥

प्रचंडवाडवानलप्रभाशुभप्रचारिणी
महाष्टसिद्धिकामिनीजनावहूतजल्पना ॥
विमुक्तवामलोचनाविवाहकालिकध्वनिः
शिवेति मंत्रभूषणा जगज्जयाय जायताम् ॥ १५ ॥

इति श्रीदशकंधरविरचितं शिवतांडवस्तोत्रं
समाप्तम् ॥

॥ **प्रचंडेति** ॥ विमुक्तवामलोचनाविवाहकालिकध्वनिर्जगज्जयाय जायतामिति संबंधः । विशेषेण मुक्ता चासौ वामलोचना सुंदरनयना पार्वती च तस्या विवाहकाले भवा विवाहकालिका ध्वनिः शब्दविशेषः । जगतो जयो जगज्जयस्तस्मै जगज्जयाय जायतामुत्पद्यतामित्यर्थः । कथंभूता विमुक्तवामलोचनाविवाहकालिकध्वनिः । प्रचंडवाडवानलप्रभाशुभप्रचारिणी । प्रचंडो भयानकश्चासौ वाडवानलः समुद्राग्निरिति प्रचंवाडवानलस्तस्येव प्रभाणि प्रकाशमानानि यान्यशुभानि तानि प्रचरितुं भक्षयितु नाशयितुं शीलमस्याः सा। पुनः कथंभूता ध्वनिः। महाष्टसिद्धिकामिनीजनावहूतजल्पना । महत्यश्च ता अष्टसिद्धयोऽणिमादयस्ताभिर्युक्ता ये कामिनीजनाः क्रीडाकुशलाः स्त्रीजनास्तैरवहूतोच्चारिता जल्पना गीतिविशेषो यस्यां सा । पुनः कथंभूता ध्वनिः । शिवेति मंत्रभूषणा । शिवेति मंत्रो भूषणं यस्याः सेत्यर्थः ॥ १५ ॥

दशास्यनिर्मितस्तोत्रे कृता सुपदयोजना ॥ श्रीमद्गुरूणां कृपया मया शंभुः प्रसीदतु ॥ १ ॥ माधवानंदो हि साधुरकरोच्छिवतांडवे ॥ पदयोजनाख्यां व्याख्यां तया शंभुः प्रसीदताम् ॥ २ ॥ महादेव महादेव महादेवेति यो वदेत् ॥ एकवाराद्भवेन्मुक्तिर्द्वाभ्यां देवो भवेद्दणी ॥ ३ ॥

॥ इति श्रीमद्ब्रह्मानंदोदासीनशिष्यमाधवानंदविरचितं शिवतांडवस्तोत्रव्याख्यानं समाप्तम् ॥

Published by Pandurang Javaji, Proprietor N. S. Press,
23, Kolbhat Lane, Bombay.

Printed by Ramchandra Yesu Shedge, at the
Nirnaya-Sagar Press, 23, Kolbhat Lane, Bombay.